# *अभिज्ञानशाकुन्तले पर्यावरणप्रतिरूपा प्रकृतिः*

*डॉ. कपिलदेवपाण्डेयः*

कालिदासस्य काव्यसरस्वत्याः सर्वोत्कृष्टं निदर्शनं अभिज्ञानशाकुन्तलमेव[1]—(कालिदासस्य सर्व-स्वमभिज्ञानशकुन्तलम्), यत्र कालिदासस्य प्रकृतिविषयिणी दृष्टिः पूर्णं विकासं प्रौढिं च प्राप्तास्ति। नाटकस्यास्य विश्वप्रसिद्धेः मुख्यो हेतुरस्ति प्रकृतिकविरूपेण प्रथितयशसा कालिदासेन कृतं प्रकृतेरन्तस्तत्त्वस्य, बाह्यतत्त्वस्य, तयोः मानवजीने प्रातिरूप्यस्य च चित्रणम्। यद्यपि कालिदासस्य सर्वासां कृतीनां पृष्ठभूमिः प्रकृतिरेव, तथापि शाकुन्तले प्रकृतिवर्णनं चरमोत्कर्षं प्राप्नोति। तत्र प्रकृतिप्रतिरूपं पर्यावरणं मानवमनोवृत्तिस्वरूपमेवास्ति, न तु जडरूपम्। शाकुन्तले प्रकृतिवर्णनेषु नवीनतायाः सजीवतायाः सरसतायाः कल्पनाप्रवणतायाश्च कश्चिदद्भुतः समन्वयो लभ्यते। तत्र प्रकृत्या सह मानवमनोभावानां तादात्म्यसम्बन्धो दरीदृश्यते। प्रकृतेः मनुष्यस्य च मिथः संवेदनासन्तुलनं दुःखसुखानुभूतिसाम्यं शाकुन्तलादन्यत्र अलभ्यमस्ति। अत एव नाटकमिदं प्रकृतिकाव्यमिति नाम्ना व्यपदेष्टुं शक्यते। महर्षेः कण्वस्य तपोवने प्रारब्धमेतन्नाटकं मारीचर्षेः तपोवने समाप्नोति। पञ्चमाङ्कवर्जं सर्वेषु अङ्केषु अस्य रङ्गमञ्चः प्रकृतेः प्राङ्गणमेव। अस्य नायिका शकुन्तला प्रकृतिपुत्री अस्ति। सा प्रकृतेः उन्मुक्तपरिवेशे प्रसूता, प्रकृत्यैव परिपालिता पोषिता प्रसाधिता च। आश्रमस्थानां लतावीरुधां, पादपानां, पशूनां, पक्षिणां च सेवां परिचरन्ती नवप्रस्फुटितयौवना निसर्गकन्या शकुन्तला कथानकस्य पर्यवसानक्षणे राजमहिषी सञ्जाता, पुत्रवती भूत्वा राजमाता चाभवत्।

कालिदासस्य प्रकृतिचित्रणमाहात्म्येन शकुन्तला प्रकृतिश्च एकात्मतां गते स्तः। अत एव समीक्षकैः शकुन्तला निसर्गकन्येत्यभिहिता—"Śakuntalā has inherited her heavenly beauty of form. Apart from this, she is literally a child of Nature in her simplicity, love of trees and creepers and deer, and her artless manners."-G.C. Jhala. तस्याः सौन्दर्यमपि नैसर्गिकमस्ति—'इदं किलाव्याजमनोहरं वपुः'। तस्याः अङ्गानि प्रकृतेरुपादानानि अनुहरन्ति—

**'अधरः किसलयरागः कोमलविटपानुकारिणौ बाहू ।**
**कुसुममिव लोभनीयं यौवनमङ्गेषु सन्नद्धम् ॥'**[2]

नाटकस्यारम्भे प्रथमाङ्के मृगयासंरम्भे कृष्णसारमृगमनुधावता मृगयाशीलेन राज्ञा दुष्यन्तेन शरपतनभयाद् भीतो मृगो यद् वर्णितः स्वभावोक्त्या उत्प्रेक्षया च तद् महाकवेः अन्तःप्रकृतेः बाह्यप्रकृतेश्च सूक्ष्मनिरीक्षण-क्षमतायाः विशिष्टं निदर्शनम्। स खलु अनुधावति रथे ग्रीवाभङ्गेनाभिरामं वारं वारं दत्तचक्षुः, शरपतनभयाद् अधिकांशेन पृष्ठभागेन कायस्य पूर्वभागं प्रविष्ट इव, अर्धचर्वितैः कुशैः श्रमव्यात्तमुखाद् पतद्भिः कृतविकीर्णमार्गः वेगेनोत्कटप्लवनात् एवं प्रतीयते यत् आकाशेऽधिकं पृथिव्यां चाल्पं गच्छति।[3]

यावद् राजा बाणं मोक्तुं सन्दधाति तावद् अन्तरसन्धिरूपो ध्वनिः श्रूयते— 'राजन् ! आश्रममृगोऽयं न हन्तव्यो न हन्तव्य' इति। राज्ञो मृगस्य च मध्ये तपस्विनः प्राप्ताः राज्ञा च बाणः प्रतिसंहृतः। मृगाणामहन्तव्यतैव न केवलम् आश्रमपरिवेशस्योपलक्षणम् इति वर्णयति दुष्यन्तः सूतं प्रति— 'वृक्षाणामधः शुकगर्भकोटरमुखात् पतिताः नीवाराः, यत्र तत्र इङ्गुदीफलभेदकाः उपलाः स्निग्धाः, उत्पन्नविश्वासाः अपरित्यक्तस्वाभाविकगतयो रथादिध्वनीन् सहमाना मृगाः, आर्द्रवल्कलाग्रभागेभ्यः पतितैः जलबिन्दुभिः रेखाङ्किताः जलाशयमार्गाश्च द्योतयन्ति तपोवनपरिवेशम्।[4] आश्रमे प्रविविक्षुर्महाराजो दुष्यन्तः सेचनघटैः बालपादपेभ्यः जलं दातुं प्रवृत्ताः शकुन्तलाप्रमुखाः तपस्विकन्यकाः विलोक्य तासां निर्व्याजं निसर्गजं सौन्दर्यं वीक्ष्य च आकृष्टो भवति विस्मयाविष्टो भूत्वा कथयति च—

**शुद्धान्तदुर्लभमिदं वपुराश्रमवासिनो जनस्य ।**
**दूरीकृताः खलु गुणैरुद्यानलता वनलताभिः ॥**[5]

अत्र वनलताप्रतीकं निसर्गकन्याशकुन्तलायाः कृतेऽस्ति उद्यानलताप्रतीकं च राजभवनस्थितानामन्तः-पुराङ्गनानां कृतेऽस्ति। महाकविः 'अक्लिष्टकान्तिः' इति पदेन सहजसौन्दर्यं प्रति स्वकीयामास्थां व्यनक्ति। सौवर्णराजतानि आभूषणानि सौन्दर्यसाधनानि नासौ मनुते। वल्कलेन सुशोभितं शकुन्तलाशरीरमवलोक्य दुष्यन्तो वदति– 'काममननुरूपमस्य वपुषो वल्कलं, न पुनरलंकारश्रियं न पुष्यति'। दृष्टान्तद्वयेन स स्वमतं द्रढयति। यथा शैवलेन सम्पृक्तं कमलं रम्यं भवति, यथा च शशिनो मलिनमपि कलङ्कलक्ष्म शोभां विस्तारयति, तथैव इयं कृशाङ्गी शकुन्तला वल्कलेनापि अधिकं रमणीया।[6] अत्र शकुन्तलया:सहजा रूपसम्पत्तिः शैवलसम्पृक्तकमलेन सकलङ्केन शशिना च मूर्तरूपेण चित्रितास्ति। एवमेव शकुन्तलायाः यौवनस्य अभुक्तपूर्वताभिव्यक्तये, तस्याः अक्षतयौवनस्य प्रतिपादनाय च अप्रस्तुतप्रशंसामाध्यमेन राजा व्याहरति–

**अनाघ्रातं पुष्पं किसलयमलूनं कररुहै-**
**रनाविद्धं रत्नं मधु नवमनास्वादितरसम् ।**
**अखण्डं पुण्यानां फलमिव च तद्रूपमनघं**
**न जाने भोक्तारं कमिह समुपस्थास्यति विधिः ॥**[7]

क्वचित् प्रकृतेरुद्दीपकेन रूपेणापि शाकुन्तलस्य मनोज्ञता विवर्द्धिता। प्रकृतिः विरहिणो विरहपीडाम् उद्दीपयति, प्रकृतेः सौन्दर्यमपि विपरीतमिव भासयति। अत एव विरहपीडितो दुष्यन्तः कथयति– 'विसृजति हिमगर्भैरग्निमिन्दुर्मयूखैः त्वमपि कुसुमबाणान् वज्रसारीकरोषि।[8] विरहिण्यो महिलाः स्वप्रियवियोगजन्यं दुःखं तथैव सोढुं न क्षमन्ते यथा चन्द्रमसि अस्तंगते वियोगमसहमाना कुमुदिनी उदासीना भवति–

**अन्तर्हिते शशिनि सैव कुमुद्वती मे**
**दृष्टिं न नन्दयति संस्मरणीयशोभा ।**
**इष्टप्रवासजनितान्यबलाजनस्य**
**दुःखानि नूनमतिमात्रसुदुःसहानि ।**

मानवमनोभावान् प्रति शाकुन्तले वर्णितान् प्रकृतेः प्रभावान् अभिलक्ष्यैव पाश्चात्त्यसमीक्षको हम्बोल्टमहोदयो व्याहरति–Kālidāsa, the celebrated author of Śakuntala, is a masterly describer of the influences which nature exercises upon the minds of lovers–Humboldt. आश्रमवृक्षकाणां सेचनसन्दर्भे यदा अनसूया शकुन्तलामभिदधाति 'तातकाश्यपेन एतेषामालवालपूरणे नवमालिकाकुसुमकोमलापि त्वम् नियुक्तासि' इति तदा शकुन्तला प्रतिवदति 'न केवलं तातनियोग एव, अस्ति मे सोदरस्नेहोऽप्येतेषु।' नूनमेतेन सिध्यति प्रकृतिपुत्री शकुन्तलेति। किञ्च केसरवृक्षकः वातेरितपल्लवाङ्गुलीभिः मां त्वरयतीति शकुन्तलोक्तिरपि तस्याः आश्रमवृक्षकान् प्रति स्नेहातिशयसम्पृक्तं व्यतिकरम् अभिव्यनक्ति। नवमालिकालतायाः नामकरणं शकुन्तलया कृतमासीत् 'वनज्योत्स्ना' इति। तस्यै जलं प्रदातुं 'एनां विस्मृतासि' इति शब्दैः अनसूयया स्मारिता शकुन्तला वदति– 'तदात्मानमपि विस्मरिष्यामि' इति। अनया प्रत्युक्त्या स्पष्टं तस्याः पर्यावरणे विद्यमानान् वृक्षकान् प्रति आत्मवद्भावोऽभिव्यज्यते, प्रकृत्या सह मानवस्य तादात्म्यसम्बन्धश्च सिध्यति शाकुन्तले। अनुदिवसं परिहीयमाना मदनार्ता शकुन्तला दुष्यन्तेन पत्राणां शोषणेन मरुता स्पृष्टा माधवीलतेव दृष्टा।[9]

सर्वोऽपि जनः स्वकीयदशाविशेषेषु पतनोत्थानाभ्यां विपत्संपद्भ्याम् च नियम्यते इति सार्वकालिकः सार्वजनीनश्च नियमः महाकविना[10] प्रभातवर्णनप्रसङ्गे प्रकृतिपरिदृश्यमाध्यमेन प्रदर्शितः। विपत्तिदशायां सम्पत्तिदशायां च दुःखहर्षौ न कार्यौ इति। अनेन आश्रमपालितायाः शकुन्तलायाः आश्रमाद् वियोगः पतिगृहगमनजन्यः प्रियमिलनरूपः संयोगश्चाभिव्यज्यते किन्तु दुर्वाससः शापप्रभावात् प्रियकृतावमाननजन्यं कष्टमपि सोढव्यमिति दुःखमपि अन्तर्भूतम्। एतत्

सर्वम् प्रकृतिमाध्यमेनैव प्रकटितम् महाकविना। अशरीरिण्या छन्दोमय्या वाण्या दुष्यन्तेनाहितं तेजो दधाना **आपन्नसत्त्वा** शकुन्तला अग्निगर्भा शमीव वर्णिता। पतिगृहगमनकाले मङ्गलसमालम्भनं तस्याः प्रसाधनं च विदधाना **प्रियंवदा याव**त् कथयति 'आभरणोचितं रूपम् आश्रमसुलभैः प्रसाधनैर्विप्रकार्यत' इति तावद् शिष्यौ आगत्य 'इदमलंकरणम्' इत्युक्त्वा अलंकरणानि प्रस्तुतवन्तौ। तानि आश्रमवनस्पतिभिः उपहाररूपेण दत्तानि आसन्। केनापि वृक्षेण श्वेतं मांगलिकं क्षौमं वस्त्रं प्रदत्तम्, अन्येन केनचित् चरणप्रसाधनाय लाक्षारसः प्रदत्तः अन्यैश्च अन्यानि विविधानि आभरणानि उपायनीकृतानि। कालिदासेन प्रकृतिः जडचित्रवत् न चित्रिता, अपितु तत्र प्राणसञ्चारं विधाय चेतनीकृता। सा मानवे शोकाकुले जाते स्वयं शोकाकुला भवति। मानवस्य हर्षकाले स्मितिं विकिरति। इयमेवास्ति प्रकृतेः संवेदना। अन्तःप्रकृतेः बाह्यप्रकृतेश्च सुन्दरः समन्वयः यथा अभिज्ञानशाकुन्तलस्य चतुर्थेऽङ्के जातोऽस्ति तथाऽन्यत्र सुदुर्लभः।

'अद्य शकुन्तला आश्रमं विहाय यास्यति' इति विचिन्त्य यस्य हृदयं समुत्कण्ठया संस्पृष्टं, कण्ठोऽश्रुप्रवाहनिरोधात् जडीभूतः, दर्शनशक्तिः जडतां गता, वैक्लव्यं गतः स महर्षिः कण्वः तपोवनवृक्षान् सम्बोधयन् कथयति—

**पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या**
**नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम् ।**
**आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः**
**सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम् ॥**[12]

अभिव्यक्तिरियं शकुन्तलायाः प्रकृतिं प्रति सातिशयं प्रेम प्रकटयति। शकुन्तला आश्रमवृक्षकान् जलम् अपाययित्वा स्वयं नापिबत्, प्रसाधनप्रिया सत्यपि वृक्षाणां नवपल्लवान् नादत्त, वृक्षाणां प्रथमपुष्पोद्भवकाले तस्याः उत्सवोऽभवत्। एवंविधा आश्रमस्थास्तरव एव तस्यै अनुमतिं दातुमधिकृताः सन्ति। अत एव महर्षिः कण्वः तदर्थं तान् समबोधयत्। वृक्षैरपि कोकिलरवमाध्यमेन शकुन्तलायै अनुमतिः प्रदत्ता—

**अनुमतगमना शकुन्तला तरुभिरियं वनवासबन्धुभिः ।**
**परभृतविरुतं कलं यथा प्रतिवचनीकृतमेभिरीदृशम् ॥**[13]

प्रकृतिपर्यावरणैः यात्रोपयुक्ता मङ्गलकामनापि कृता—

**रम्यान्तरः कमलिनीहरितैः सरोभि-**
**श्छायाद्रुमैर्नियमितार्कमयूखतापः ।**
**भूयात्कुशेशयरजोमृदुरेणुरस्याः**
**शान्तानुकूलपवनश्च शिवश्च पन्थाः ॥**[14]

पतिगृहं प्रति प्रस्थानकाले न केवलं शकुन्तलैव तपोवनविरहकातरासीत्, अपितु शकुन्तलया प्राप्तवियोगं तपोवनमपि समानरूपेण वियोगविक्लवमासीत्। तत्रत्या मृग्यः उद्गलितदर्भकवलाः आसन्, मयूरैः नर्तनं परित्यक्तं, लताः पाण्डुपत्ररूपेण अश्रूणि अमुञ्चन्। लताभगिनीं वनज्योत्स्नां गन्तुमामन्त्रयते शकुन्तला, यतो हि वनज्योत्स्नया सह तस्याः सोदर्यास्नेह आसीत्। सा तत्रान्तिके गत्वा कथयति-'वनज्योत्स्ने! अद्यप्रभृति दूरपरिवर्तिनी ते खलु भविष्यामि।' एवंविध आसीत् शकुन्तलाया आश्रमस्थानां लतावीरुधां च परस्परं स्नेहसंश्लेषः। लतामालिङ्ग्यापि सा सख्यौ सम्बोध्य कथयति—'एषा युवयोर्हस्ते निक्षेपः।' उटजपर्यन्तचारिण्याः गर्भमन्थरायाः आसन्नप्रसवायाः प्रसवविषये चिन्तातुरा शकुन्तला तद्गतं वृत्तं प्रेषयितुं निवेदयति तातकण्वम्। प्रसवकाले एव यस्य जननी उपरता तस्य संवर्द्धनं पालनं च शकुन्तलैव अकार्षीत्। तस्य कुशसूचिविद्धे मुखे इङ्गुदीनां व्रणविरोपणं तैलं न्यसिञ्चत्। तं श्यामाकमुष्टिप्रदानैः पर्यवर्धयत्। स मृगस्तस्याः प्रस्थानकाले निवसनं गृहीत्वा संलग्नोऽभूत्। 'तातस्त्वां मया विरहितं चिन्तयिष्यति, निवर्तस्व' इत्युक्त्वा प्रेम्णा तं न्यवर्तयत्। अश्रूणि निरोद्धुमक्षमा सा गन्तव्यं मार्गं सम्यक्तया द्रष्टुं नाशक्नोत्। आश्रमाभिमुखी भूत्वा

तातकण्वमकथयत्—तात! मलयतरून्मूलिता चन्दनलता यथा देशान्तरे जीवितं न धारयति तथैव अहं कथं तवाङ्कात् परिभ्रष्टा जीवितं धारयिष्ये इति, अपृच्छच्च कदा नु खलु भूयस्तपोवनं प्रेक्षिष्ये इति। तपोवनपालितायाः शकुन्तलायाः पुनः तपोवने आगन्तुमिच्छा स्वाभाविकी। एवं वयं पश्यामो यत् चतुर्थेऽङ्के प्रकृतेः मानवमनोभावैः सह ऐकात्म्यं साधु चित्रितम् महाकविना। तपोवनाद् वियोगस्य यावती मर्मस्पर्शिता करुणाप्रवणता च यावती अभिज्ञानशाकुन्तलस्य चतुर्थेऽङ्के दृश्यते तावती विश्वसाहित्येऽन्यत्र दुर्लभा—'The close sympathy of human mind with nature and the deep feelings of the human heart are vividly depicted in the fourth act of Śākunatala. That is why this act is considered to surpass the other acts in poetic beauty.[15]

आश्रमस्योन्मुक्ते प्रकृतिप्रधाने चाभ्यस्तजीवनः शार्ङ्गरवः दुष्यन्तस्य राजभवने उद्विग्न इवानुभवति। तत् जनाकीर्णं स्थानं वह्निज्वालाभिः परिवृतं गृहमिव पश्यति। शारद्वतोऽपि तत्समर्थयन् कथयति— 'पुरप्रवेशकालादेव भवान् इत्थंभूतः संवृत्तः। अहमपि इह सुखासक्तं जनं तथैव अवगच्छामि यथा स्नातः तैलाभ्यक्तं, शुचिः अशुचिम्, प्रबुद्धः सुप्तम्, स्वैरगतिः बद्धम् अवगच्छति।'[16] अयमेवास्ति भेदः तपोवनजीवने पर्यावरणप्रदूषिते नगरजीवने च।

पञ्चमेऽङ्के राज्ञा दुष्यन्तेन प्रत्याख्याता शकुन्तला तं विश्वासयितुं प्रथममिलनकाले संवृत्तम् वृत्तमेकं स्मारयति—'एकस्मिन् नवमालिकाकुञ्जे दुष्यन्तशकुन्तलयोः केलिपरयोः सन्निकटे दीर्घापाङ्गो नाम शकुन्तलायाः पुत्रकृतको मृगपोतक उपस्थितोऽभवत्। दुष्यन्तस्तं प्रिया-प्रियं नलिनीपत्रभाजनगतमुदकं पाययितुं समभ्यर्थयत्। किन्तु अपरिचयात् स दुष्यन्तसकाशं नोपगतः। पश्चात्तस्मिन्नेव जले शकुन्तलया गृहीते पातुं प्रावर्तत। तदा दुष्यन्तः प्रहसितवान् 'सर्वः सगन्धेषु विश्वसिति' अर्थात् उभौ शकुन्तला मृगश्च आरण्यकौ वन्यौ इति। एतेन ज्ञायते यत् यथा मृगस्तपोवनसंस्कारसंस्कृतस्तथा शकुन्तलापि।

नाटकस्य भरतवाक्ये प्रयुक्तं प्रकृतिशब्दं पर्यावरणार्थे (nature) न तु प्रजार्थे व्याचक्षाणाः केचन समीक्षकाः 'पार्थिवो राजा प्रकृतिहिताय पर्यावरणपरिष्काररूपाय श्रेयसे प्रवृत्तो भवतु' इति व्याचक्षते। अन्ते निष्कर्षरूपेण एवं वक्तुं शक्यते यत् प्रकृतिहितपरायणः प्रकृतिकविः कालिदासः अभिज्ञानशाकुन्तले नाटके तन्नायिकायाः शकुन्तलायाः जीवनवृत्ते च कात्स्न्र्येन मञ्जुलं समन्वयं सामरस्यं च संस्थाप्य मानवस्य प्रकृत्या सह तादात्म्यस्य चरमं विकासं प्रस्तुतवान्, तेन प्रकृतिहितं साधितवांश्च।

**पाद टिप्पणी**

1. The Abhijñānaśākuntala is the climax of the poetic and dramatic power of Kālidāsa-Introduction, page 47 - M.R. Kale.
2. अभिज्ञानशाकुन्तलम् 1.19
3. तदेव 1.7
4. तदेव 1.14
5. तदेव 1.15
6. तदेव 1.18
7. तदेव 2.10
8. तदेव 3.3
9. तदेव 3.8
10. तदेव 4.2
11. तदेव 4.5
12. तदेव 4.9
13. तदेव 4.10
14. तदेव 4.11
15. A.W. Ryder
16. अभिज्ञानशाकुन्तलम् 5.10